# श्रीमद् भागवत रसिक कुटुंब

## वृन्दादेव्यष्टकम्

गाङ्गेयचाम्पेयतडिद्विनिन्दि, रोचिः(फ्)प्रवाहस्नपितात्मवृन्दे ।
बन्धूकबन्धुद्युतिदिव्यवासो, वृन्दे नमस्ते चरणारविन्दम् ॥1॥

बिम्बाधरोदित्वरमन्दहास्य, नासाग्रमुक्ताद्युतिदीपितास्ये ।
विचित्ररत्नाभरणश्रियाढ्ये, वृन्दे नमस्ते चरणारविन्दम् ॥2॥

समस्तवैकुण्ठशिरोमणौ श्री- कृष्णस्य वृन्दावनधन्यधामिन् ।
दत्ताधिकारे वृषभानुपुत्र्या, वृन्दे नमस्ते चरणारविन्दम् ॥3॥

त्वदाज्ञया पल्लवपुष्पभृङ्ग- मृगादिभिर्माधवकेलिकुञ्जाः ।
मध्वादिभिर्भान्ति विभूष्यमाणा, वृन्दे नमस्ते चरणारविन्दम् ॥ 4॥

त्वदीयदौत्येन निकुञ्जयूनो, अत्युत्कयोः(ख्) केलिविलाससिद्धिः ।
त्वत्सौभगं(ङ्) केन निरुच्यतां(न्) तद्- वृन्दे नमस्ते चरणारविन्दम् ॥ 5॥

रासाभिलाषो वसतिश्च वृन्दा- वने त्वदीशाङ्घ्रिसरोजसेवा ।
लभ्या च पुं(म्)सां(ङ्) कृपया तवैव, वृन्दे नमस्ते चरणारविन्दम् ॥6॥

त्वं(ङ्) कीर्त्यसे सात्वततन्त्रविद्भिर्- लीलाभिधाना किल कृष्णशक्तिः ।
तवैव मूर्तिस्तुलसी नृलोके, वृन्दे नमस्ते चरणारविन्दम् ॥7॥

भक्त्या विहीना अपराधलेशैः(ख्), क्षिप्ताश्च कामादितरङ्गमध्ये ।
कृपामयि त्वां(म्) शरणं(म्) प्रपन्ना, वृन्दे नमस्ते चरणारविन्दम् ॥8॥

वृन्दाष्टकं(यँ) यः(श्) शृणुयात्पठेच्च, वृन्दावनाधीशपदाब्जभृङ्गः ।
स प्राप्य वृन्दावननित्यवासं(न्), तत्प्रेमसेवां(लँ) लभते कृतार्थः ॥9॥

॥ इति विश्वनाथचक्रवर्तीठकुरकृतं(वँ) वृन्दादेव्यष्टकं(म्) सम्पूर्णम् ॥